योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ०७

सप्तमः सर्गः ७

श्रीवसिष्ठ उवाच ।

एष तावत्क्रमः प्रोक्तः सामान्यः सर्वदेहिनाम् ।

इममन्यं विशेषं त्वं श्रृणु राजीवलोचन ।। १

अस्मिन्संसारसंरम्भे जातानां देहधारिणाम् ।

अपवर्गक्षमौ राम द्वाविमावुत्तमौ क्रमौ ।। २

एकस्तावद्गुरुप्रोक्तादनुष्ठानाच्छनैः शनैः ।

जन्मना जन्मभिर्वापि सिद्धिदः समुदाहृतः ।। ३

द्वितीयस्त्वात्मनैवाशु किंचिद्व्युत्पन्नचेतसा ।

भवति ज्ञानसंप्राप्तिराकाशफलपातवत् ।। ४

नभःफलनिपाताभज्ञानसंप्रतिपत्तये ।

तत्रेमं श्रृणु वृत्तान्तं प्राक्तनं कथयामि ते ।। ५

श्रृणु सुभग कथां महानुभावा

व्यपगतपूर्वशुभाशुभार्गलौघाः ।

खपतितफलवत्परं विवेकं

चरमभवा विमलं समश्नुवन्ति ।। ६

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० मोक्षोपायेषूपशमप्रकरणे आकाशफलप्राप्तिवज्ज्ञानसंप्राप्तिक्रमसूचनं नाम सप्तमः सर्गः ।। ७ ।।